**आचार्यद्वितीयवर्षम्**

**प्रथमपत्रम् (दत्तकमीमांसा)**

**Q. 1- द्वादशपुत्रेषु दत्तकस्य स्वरुपमहत्वं च नन्दपण्डित दिशा विमृशत ।**

भारतवर्षे धर्मस्य महत्वं प्रायशःसर्वत्र दरीदृश्यते । कोलाहलमयसंसारे मानवानां कृते किं किं करणीयमकरणीयं येत्यस्मिन् विषये धर्मशास्त्रेषु लिखितमस्ति । तेषु धर्मशास्त्रेषु मनुष्याणां कृते वहवः उपदेशाः उपदिश्यन्ते ऋषयः। चतुर्षु पुरूषार्थेषु धर्मार्थकामाः अनित्याः । तेषाम् अनित्यत्वं प्रत्यक्षेणऽपि ज्ञान्तुं शक्यते। चतुर्थस्तु परमपुरूषार्थः मोक्षः नित्य अविनाशी च । जीवेषु मनुष्यःश्रेष्ठः। मानवजीवनस्य चरमलक्ष्यं भवति मोक्षप्राप्तिःयदि ऋणापकरणं न भवति तर्हिः मोक्षप्राप्तिः नाभवति । मोक्षेच्छातः प्राक् त्रीणि ऋणान्यवश्यमपाकरणीयानि भवेयुः । अन्यथा नरकगमनं ध्रुवमेव । यथोक्तं मनुना –

**ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।**
**अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ।।**
**अधीत्य विधिवद् वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।**
**इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत् ।। इति ।।**

जायमानः मनुष्यः त्रिभिः ऋणैर्जायते । देवऋणं, पितृऋणं, ऋषिऋणं ,चेति । देवार्चनेन यागादीनामनुष्ठानेन च देवऋणात्, स्वध्यायाध्ययनेन ऋषिऋणात् मनुष्यःविमुक्तो भवति । पितृऋणं तु पुत्रोत्पादनेन निराक्रियते । पितुरूद्देश्येन पिण्डोदकदानादिना तदृणपरिशोधकत्वेन नरकनिवर्त्तकत्वेन स्वर्गादिप्रापकत्वेन च पितृधने पुत्रोऽधिकारी भवति । अत एव पुत्रस्य भूयसी प्रशंसा लोके श्रूयते । मनुना उक्तम् -

**पुत्त्रेण लोकाञ् जयति पौत्त्रेणाऽऽनन्त्यमश्नुते ।**
**अथ पुत्रस्य पौत्रेण ब्रघ्नस्याऽऽप्नोति विष्टपम् ।।**

पुन्नामो नरकात् त्रायते इति पुत्रशब्दस्य व्युत्पत्तेरपि पुत्रस्य पितृनरकोद्धरणे प्रयोजनीयता प्रतिपाद्यते प्रसङ्गेऽस्मिन्नुक्तं मनुना यत् –

**पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ।**
**तस्मात् पुत्त्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ।।**

यद्यपि पुत्रशब्देन सामान्यतः औरस एव पुत्रो गृह्यते ,तथापि तदभावे अन्ये एकादशविधाः पुत्राः तस्य प्रतिनिधिरूपेण वर्त्तन्ते । अत एवोक्तं मनुना प्रसङ्गेऽस्मिन् –

**औरसःक्षेत्रजश्चैव दत्तः कृत्रिमः एव च ।**
**गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ।।**

**कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।**

**स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ।।**

**1.औरसः**- सवर्णायां संस्कृतायां स्वयमुत्पादितः पुत्र औरसः। स च मुख्यपुत्रः । यथा देवक्यां वसुदेवेनोत्पादितः पुत्रः श्रीकृष्णः ।

2.**क्षेत्रजः** – एकादशविधेषु गौणपुत्रेषु परक्षेत्रे परस्य पत्न्यां जातः क्षेत्रजः । यथा महाभारते व्यासेन विचित्रवीर्यस्य पत्न्यामम्बिकायामम्बालिकायाञ्च क्रमेण नियोगविधिनोत्पादितः पुत्रः धृतराष्ट्रः पण्डुश्च ।

3.**दत्तकः** – मातापितृभ्यामन्यतरेण दत्तः दत्तकः । यथा लोमपादस्य दत्तकाकन्या शान्ता ।

4.कृत्रिमः – प्रलोभनप्रदशनपूर्वकं स्वीकृतः पुत्रः कृत्रिमः ।

5. गूढजः – स्वपत्न्यामन्येन परपुरूषेण प्रछन्नभावेन चौर्यरताहितगर्भमूलक उत्पन्नो गूढजः ।

6.अपविद्धः- मातृपितृभ्यां परित्यक्तो येन परिपालितः स तस्याऽपविद्धपुत्रः । यथा कण्वपरिपालिता कन्या अपविद्धा कन्या ।

7.कानीनः – कन्याभवः कानीनः । स च मातामहसुत इति कथ्यते । यथा कुन्त्याः कन्यावस्थायामुत्पादितः पुत्र कर्णः।

8. सहोढः- गर्भे स्थितः गर्भिण्यां परिणीतायां यः परिणीतः तस्य वोढुः पुत्रः सहोढः ।

9.क्रीतपुत्रः- मूल्यदानेन क्रीतः पुत्रः क्रीतपुत्रः । यथा – हरिश्चन्द्रस्य शुनशेफः ।

10.पौनर्भवः – प्रथममेकस्य जाया भूत्वाऽपरस्य पुनर्या जाया भवति सा पुनर्भूः । तस्यां पुनर्भ्वां जातः पौनर्भवः ।

11.स्वयंदत्तः- आत्मानं पुत्ररूपेण यः ददाति स स्वयंदत्तः । यथा विश्वामित्रस्य पुत्रः शुनशेफः ।

12.शौद्रः- द्विजातिभिः शुद्रायामुत्पादितः पुत्रः ।

मनुवचनानुसारं पूर्वे षट्पुत्रा दायहरा अपरे षट् च केवलं ग्रासाच्छादनभागिनो भवन्तीति कथितम् । पूर्वेषु षट्स्वपि प्राधान्यमौरसस्यैव तस्य धर्मजत्वात् । परन्तु यस्य औरसपुत्रःनास्ति सः दत्तकपुत्रः ग्रहीष्यति । साम्प्रतिककाले औरसपुत्राभावे,दत्तकपुत्रस्यैव ग्रहणं सर्वैःक्रियते । कलियुगे केवलं दत्तकपुत्रस्य स्वीकारो भवति इति **कलिधर्मप्रस्तावे पराशरस्मरणात्** न चैवं क्षेत्रजोऽपि पुत्रः कलौ स्यादिति वाच्यम् । कलौ तु औरसदत्तकपुत्रद्वयमात्रं ग्राह्यम् । यथोक्तमादित्यपुराणे –

" **दत्तौरसेतरेषान्तु पुत्रत्वेन नपरिग्रहः**" **इति ।**

मनुना दत्तकस्थाने दत्रिम इति शब्दः प्रयुक्तः। एवं भूतस्य दत्तकनामाधेयस्य दत्रिमापरपर्यायस्य किं तावल्लक्षणमिति जिज्ञासायां मनुना प्रतिपादितं यत् –

**मातापिता वा दद्यातां यमद्भिः पुत्त्रमापदि ।**
**सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः ।।इति।।**

अर्थात् माता पिता वा परस्परानुज्ञया यं पुत्रं परिग्रहीतुः समानजातीयं तस्यैव पुत्राभावनिमित्तायामापदि प्रीतियुक्तं न तु भयादिना उदकपूर्वकं दद्यात्सदत्त्रिमाख्यो पुत्रो ज्ञेयः ।

पुत्रदानञ्च जलदानपूर्वकं कार्यम् । अपि चापदि पुत्रो देय इत्युक्तेऽनापदि न देय इति बोध्यते । बहु अपरार्केणापि तथा - '**आपदि प्रतिग्रहीतुरपुत्रत्वे ' इति ।** यद्वाऽऽपदि दुर्भिक्षादौ । आपद्ग्रहणादनापदि न देयः । दातुरयं प्रतिषेध इति मिताक्षरा । तथा च कात्यायनः –

**आपत्काले तु कर्त्तव्यं दानं विक्रय एव वा ।**
**अन्यथा न प्रकर्त्तव्यमिति शास्त्रविनिश्चयः ।। इति ।।**

मनुरपि – **अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः ।**
**पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च ।।**

अत्रि उक्तम् - **अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।**
**पिण्डोदकक्रियाहेतोर्यस्मात्तस्माप्रयत्नतः ।।**

यथोक्तं शौनकेन -'वस्त्रादिभिरलंकृत्य पुत्रच्छायावहं सुतम्'इति अत्र पुत्रछायावहस्यार्थः पुत्रसदृशमिति व्यवहारमयुखकारेणोक्तम् । तथैव दत्तकमीमांसायामपि'पुत्रचछाया पुत्रसादृश्यम्'इत्युक्तमस्ति ।

अपुत्रेण सुतः कार्यः इति अपुत्रेणेत्यत्रैकवचनश्रवणान्न द्वाभ्यां बहुभिर्वा एकपुत्रः ग्रहणीयः। एकपुत्रो न देयः । 'न त्वेवैकं पुत्र दद्यात्प्रतिगृह्णीयाद्वा' वसिष्ठस्मरणात् । तथा अनेकपुत्र सद्भावेऽपि ज्येष्ठो न देयः । 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः' अर्थात् यस्य जनस्य औरसपुत्रः नास्ति सः भवति अपुत्रिकः, न वा मृतपुत्रो अजातपुत्रो इति । एवं भूतः अपुत्रिको जनः पुत्रलाभाय पुत्रिणं प्रतिगच्छति, पुत्रं देहीति तं पुत्रिणं याचेत् । सर्वदा सपिण्डात् सगोत्रात् समानवर्णादेव दत्तपुत्रं गृह्णीयात् । वस्तुतः दत्तकः औरस-पुत्रः इव सर्वविधकर्मसु समानाधिकारी भवति । यथा औरसः जनयितु र्धनेऽधिकारी तथा दत्तकः पालयितु र्धने अधिकारी भवतीति । दत्तकःग्रहीतुः पुत्रसदृशं भवेत् । अयञ्च दत्तकपुत्रः द्विविधो भवति । केवलदत्तकः द्य्वामुष्यायणश्चेति । तत्र संविदं विना केवलदत्तकः एवं आवयोरसौ इति संविदा यः दीयते सद्य्वामुष्यायणः । नन्दपण्डितेनायं दत्तकपुत्रः शुद्धदत्तकद्य्वामुष्यायणभेदेन द्विधा विभक्तः, पुनश्च द्य्वामुष्यायणदत्तकः अपि नित्यानित्यभेदेन द्विधा कृतः । तत्र नित्यद्य्वामुष्यायणं नाम यः जनकप्रतिग्रहीत्रोरुभयो पुत्रो भवेदित्युक्त्वा दीयते । किन्तु अनित्यद्य्वामुष्यायणः सो भवति , यस्तु चूडान्तैः संस्कारैः जनकेन संस्कृतः एवमुपयनादिसंस्कारैः प्रतिग्रहित्रा संस्कृतः । एतस्य गोत्रद्वयेन संस्कृतत्वात् द्य्वामुष्यायणत्वमागछति अनित्यया इति तेनोक्तम्

। अपुत्रकारीणः सर्वदा दत्तकपुत्रः ग्रहीतुं शक्यते, पुनः कः दत्तकः भवितुमर्हतीति जिज्ञासायां वसिष्ठवचनमुत्थाप्य नन्दपण्डितेनोक्तं यत् - अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयादिति। अर्थात् सन्निकृष्टः सपिण्डः। सगोत्रत्वेन बहुपुरुषान्तरापेक्षया स्वल्पपुरुषान्तरः सन्निकृष्टः। अतः प्रथम समानगोत्रसपिण्डः दत्तको भवेत्। तदभावेऽसमानगोत्रसपिण्ड- समानगोत्रासापिण्डयोरन्यतरः , तदभावे चासमानगोत्रासपिण्डोऽपि दत्तकत्वेन ग्रहीतुं शक्यते।

## Q.2- लघुत्तरीयाः प्रश्नाः।

1. दत्तकमीमांसा पुस्तकस्य मङ्गलाचरण किम् ?
   उत्तरम् – **अभिवन्द्य जगद्वन्द्यपदद्वन्दं विनायकम्।**
   **पुत्रीकरणमीमांसा कुरूते नन्दपण्डितः ।।**
2. दत्तकमीमांसा पुस्तकस्य रचयिता कः ?
   उत्तरम् – नन्दपण्डितः।
3. प्रयोजनं कतिविधम् ?
   उत्तरम् – द्विविधम् यथा - अन्येच्छा, अनधीनेच्छा।
4. दत्तकग्रहणे कस्याधिकारः नास्ति ?
   उत्तरम् – दत्तकग्रहणे स्त्रीणां अधिकारः नास्ति।
5. केन सर्वदा पुत्र प्रतिनिधिः कर्त्तव्यः ?
   उत्तरम् – अपुत्रेण सर्वदा पुत्रप्रतिनिधिः कर्तव्यः।
6. अपुत्रः शब्देन कः अर्थः बोध्यते ?
   उत्तरम् – अजातपुत्रः, मृतपुत्रः,अपुत्रःवा।
7. कः त्रिभिः ऋणैः ऋणिवान् जायते ?
   उत्तरम् – जायमानः ब्राह्मणः।
8. कतिविधानि ऋणानि। तानि कानि कानि ?
   उत्तरम् – तानि ऋणानि त्रिविधानि सन्ति यथा – ऋषिऋणम्,देवऋणम्,पितृऋणम्।
9. पुत्रपदेन के जायन्ते ?
   उत्तरम् – पुत्र पदेन पुत्र ,पौत्र, प्रपौत्र जायन्ते।
10. श्रुतिः नाम किम् ?
   उत्तरम् – श्रुतिः नाम वेदः।
11. कन्यां के रक्षेयुः ?
   उत्तरम् – रक्षेत् कन्यां पिताविन्नां पतिः पुत्राश्चवार्द्धके।
अभावे ज्ञातयस्तेषां न स्त्रीस्वातंत्र्यमर्हति ।।
12. वृद्धौ कति श्राद्धं स्मृतम् ?
   उत्तरम् – श्राद्धत्रयम् स्मृतम् ।

**मातृश्राद्धन्तु पूर्वं स्यात् पितॄणां तदनन्तरम् ।**
**ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं स्मृतम् ।।**

13. वशिष्ठमतेन साध्वीस्त्री केन प्रकारेण स्वर्गं गछति ?

उत्तरम् – **मृते भर्तरि साध्वीस्त्री व्रह्मचर्ये व्यवस्थिता ।**
**स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ।।**

14. विधवायाः पुत्रप्रतिग्रहे अधिकारः अस्ति वा नास्ति ?

उत्तरम् – नास्ति ।

15. दत्तकः कतिविधम् ? किम् किम् ?

उत्तरम् – दत्तकः द्विविधम् यथा – द्वामुष्यायणः,शुद्धदत्तकः ।

16. कलङ्कस्य परिहारः केन माध्यमेन भवति ?

उत्तरम् – व्रह्मचर्येण ।

17. मनुमतेन कानीनपुत्रस्य किं लक्षणम् ?

उत्तरम् – **पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।**
**तं कानीनं वदेन्नाम्ना वोढुः कन्या समुद्भवम् ।।**

18. सहोढजपुत्रस्य लक्षणम् -

अत्तरम्- **या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सति ।**
**वोढुः स गर्भो भवति सहोढ इति चोच्यते ।।**

19. औरसपुत्रस्य लक्षणम् (मनुना उक्तम्) –

**स्वक्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम् ।**
**तमौरसं विजानीयात् पुत्त्रं प्रथमकल्पितम् ।।**

20. के मन्त्राः कन्यास्वेव प्रतिष्ठिताः ?

उत्तरम् – पाणिग्रहणादि मन्त्राः ।

21. नन्दपण्डितः कुत्रत्यः ?

उत्तरम् – वदेरग्रामस्य (दक्षिणभारतीयः) ।

22. किदृशीं कन्यां उद्वहेत् ?

उत्तरम् – **अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रीयमुद्वहेत् ।**
**अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।।**

23. कः पुत्रःमुख्यः ?

उत्तरम् – औरसः।

24.गौणपुत्राः के ?

उत्तरम् – अन्य एकादशविधाः पुत्राः गौणपुत्राःभवन्ति ।

25. कस्य लोकः नास्ति

उत्तरम् – अपुत्रस्य लोकः नास्ति ?

26. कौ पुत्रं दद्याताम् ?

उत्तरम् – मातापितरौ।

27. नारीणामन्यपतिः कदा विधीयते ?

उत्तरम् – **नष्टे मृते प्रव्रजिते क्लीवे पतिते पतौ।**

**पञ्चस्वापप्सु नारीणां पतिरन्यो विधीयते ।।**

28. महागुरू निपाते संवत्सरं यावत् कानि वर्जयेत्

उत्तरम् – अन्यश्राद्धं,परान्नं,गन्धं,माल्यं,मैथुनम्,वर्जयेत्।

29. पुत्राभावे पिण्डं केन दद्यात् ?

उत्तरम् – पत्नी दद्यात्।

30. दैवविवाहस्य लक्षणम् किम् ?

उत्तरम् – **यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते।**

**अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते ।।**